**Bachelor of Arts (B.A.) Part—I Semester—II Examination**
**SANSKRIT**
**Optional**
**(Other Language)**

835

समय: — होरात्रयम्] [गुणाङ्का: —80

**सूचना :—** विशेषनिर्देशाभावे स्वीकृतमाध्यमेन उत्तराणि लिखत।

1. (अ) अनुवादं कुरुत :— 5

नाविक:— अहो प्रक्षोभोऽद्य सागरस्य ? (सहसा कुतश्चित् शब्दं आकर्णयन्निव) किं ब्रवीषि ? अद्य एवं अतिमात्रं प्रक्षुब्धे सागरे किमिति निर्मनुष्यां श्रीपादशिलां प्रति नौकां नयसि इति' अयि मूढे! यदि तत्र अहं न गच्छामि तर्हि भगवती कन्याकुमारी मह्यं प्रकुप्येत्। सर्वथा दुरन्त: खलु देवतानां प्रकोप:। तद् अवश्यं गच्छामि। (तत: प्रविशति सत्वरं नाविकपत्नी)

नाविकपत्नी:— (समुद्राभिमुखं धावन्तं तं सहसा आकृष्य) ननु भणामि प्रक्षुब्ध: अद्य सागर:।

**अथवा**

अन्येद्यु: स मुनि: समन्बिण्य तं धर्मव्याधं विपणिस्थं मांसानि विक्रीणन्तं उपागच्छत्। धर्मव्याध: च दृष्ट्वा एव तं मुनिं अभाषत-ब्रह्मन्! किं पविव्रतया तया इह त्वं प्रेषित: ? तदाकर्ण्य स मुनि: विस्मित: धर्मव्याधम् अवादीत्। भद्र! मांसविक्रयिण: ते कथम् ईदृशं विज्ञानम् ? इति अभिहितवन्तं तं मुनिं धर्मव्याधो निजगाद–अहं मातापित्रो: भक्त:। तौ हि मम परायणम्।

(ब) अनुवादं कुरुत :— 5

वास: काञ्चनपञ्जरे नृपकराम्भोजैस्तनूमार्जनम्।
भक्ष्यं स्वादु-रसाल-दाडियफलं पेयं सुधाभं पय:।।
पाठ: संसदि रामनाम सततं धीरस्य कोरस्य मे।
हा! हा! हन्त! तथापि जन्मविटपिकोडं मनो धावति।।

**अथवा**

मातेव रक्षति पितेव हिते नियुङ्क्ते
कान्तेव चापि रमयत्यपनीय खेदम्।।
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं
किं किं न साधयति कल्पलतेव विद्या।।

2. ससन्दर्भं स्पष्टीकरणं लिखत :— 5

(अ) आगमदीपदृष्टेन खल्वध्वना सुखेन वर्तते लोकयात्रा।

**अथवा**

तथापि गृहगतैः अनुगन्तव्याः एव लोकवृत्तयः।

(ब) नास्त्यदेयं महात्मनाम्। 5

**अथवा**

तस्मै वदान्यगुरवे तरवे नमोऽस्तु।

3. कथां स्वशब्दैः लिखत :— 10

शालिवाहन कथा

**अथवा**

वदान्यश्रेष्ठः भोजः।

4. सारांश लिखत :— 10

तिलक प्रशंसा

**अथवा**

मम भारतं विजयते।

5. (अ) निम्नलिखितं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि **संस्कृतभाषया** लिखत :— 5

अथ राज्यश्रीः अपि नृत्यगीतादिषु कलासु प्रतिदिवसम् उपचीयमानपरिचया शनैः शनैः अवर्धत। परिमितैः एव दिवसैः यौवनम् आरुरोह। निपेतुः तस्यां एकस्यां शराः इव लक्ष्यभुवि सर्वेषां दृष्टयः। दूतप्रेषणादिभिश्च तां ययाचिरे राजानः। कदाचित्तु राजा अन्तःपुरप्रासादस्थितः पार्श्वस्थितां महादेवीम् उत्सारितपरिजनः जगाद। 'देवि', तरुणीभूता वत्सा राज्यश्रीः।

(i) राज्यश्रीः कासु कलासु परिचिता ?

(ii) तस्यां केषां दृष्टयः निपेतुः ?

(iii) राजानः तां कथं ययाचिरे ?

(iv) अस्य पाठस्य नाम किम् ?

(v) अस्य पाठस्य कर्ता कः ?

(ब) निम्नलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि **संस्कृतभाषया** लिखत :— 5

धर्मोऽयमेव पुत्राणां मातृपितृ-निषेवणम्।
स्वधर्मे निधनं श्रेय एवमाह मम प्रियः।।
यदा माता तु क्रुद्धा स्यात्सान्वयेन्नम्रभाषणैः
मातैवैका गतिर्नान्यत् 'मातृदेवो' श्रुतेः।।

(i) पुत्राणां कः धर्मः ?

(ii) स्वधर्मे निधनं श्रेय इति कः आह ?

(iii) यदा माता क्रुद्धा स्यात् तदा किं कर्तव्यम् ?

(iv) का एका एव गतिः ?

(v) किं श्रुतिवचनम् ?

6. टिप्पणी लिखत :— 20

(1) भर्तृहरि:

(2) विष्णुशर्मा।

(3) आर्यभट्ट:

(4) वराहमिहिर:।

7. (अ) अनुरूपं योजयत :— 5

| | अ | ब |
|---|---|---|
| (1) | आर्यभट्ट: | विवेकानन्दविजयम् |
| (2) | भास्कराचार्य द्वितीय: | आर्यभटीयम् |
| (3) | वराहमिहिर: | लीलावती |
| (4) | डॉ. श्री. भा. वर्णेकर: | गङ्गालहरी |
| (5) | जगन्नाथपण्डित: | बृहत्संहिता |

(ब) उचितै: पर्यायै: रिक्तस्थानानि पूरयत :— 5

(1) श्रीहर्ष: _______ इति महाकाव्यं रचितवान्। (शिशुपालवधम्, नैषधीयचरितम्)

(2) शूद्रकेण _______ इति सामाजिकं नाटकं रचितम्। (गंगावतरणम्, मृच्छकटिकम्)

(3) मुद्राराक्षसम् इति नाटकं _______ लिखितम्। (विशाखदत्तेन, अम्बिकादत्तेन)

(4) __________ शहाजहानस्य सभाकवि: आसीत। (भर्तृहरि:, पण्डितराज: जगन्नाथ:)

(5) पञ्चतन्त्र इति नीतिकथासंग्रह: _______ नाम्ना कविना रचित:। (विक्रमादित्य, विष्णुशर्मा)